M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 516

Title: Shiromani

516

~~शिरोमणी~~
शिरोमणि: || Incomplete

Shiromani		: Title
:	:	: Author
:	:	: Editor
:	:	: Year, Vols.
:	:	: Publisher
516 :	: Ends abruptly	: Remarks

।।श्रीराम।। श्री शुभंभवतु।। अथशिरोमणि प्रारंभः।।

।। अथशिरोमणीप्रारंभः।। श्रीशुभंभवतु।।

516

श्रीगणेशाय नमः॥ ॐ॥ सर्वमिदं सति व्याप्तिनिश्चये स्यात् स एव तु न संभवत्युपायाभावादित्यत आह॥ व्याप्तिग्र
ति॥ समस्ता नुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमारभते॥
नत्वित्यादिना साध्याभाववदवृत्तित्वस्याव्याप्यवृत्तिसाध्यकसद्धेताववयाप्तिमाशंक्याह। साध्यवद्भिन्नेति। साध्यव
द्भिन्नेयः साध्याभाववस्तद्वृत्तित्वमर्थः॥ कर्मादौ संयोगाद्यभावस्य भिन्नत्वेमानाभावादाह साध्यवदिति॥ हेतोः साध्य
वत्यक्षभिन्नदृष्टांतवृत्तित्वेनाव्याप्तेराह। सकलेति॥ साकल्यं साध्याभाववति साध्ये च बोध्यं॥ साध्याभावो वा सा
ध्यतावच्छेदकावच्छिन्नप्रतियोगिताको ग्राह्यः॥ तेन विपक्षैकदेशनिष्ठाभावप्रतियोगिनि व्यभिचारिणि नाव्याप्तिः
॥ न वा नानाव्यक्तिसाध्यकसद्धेताव व्याप्तिः॥ अव्याप्यवृत्तिसाध्यक व्याप्यवृत्तिसद्धेताव व्याप्तेः व्यभिचारिणि चा
व्याप्यवृत्तावत्ति व्याप्तेर्वारणायाभावद्वये प्रतियोगिव्यधिकरणत्वं बोध्यं॥ हेत्वभावोऽपि प्रतियोगितावच्छेदकाव
च्छिन्नप्रतियोगिव्यधिकरणः। तत्प्रतियोगित्वं च हेतुतावच्छेदकरूपेण बोध्यं॥ तेन द्रव्यत्वादौ साध्ये विशिष्टसत्ता
दौ नाव्याप्तिः। न वा विशिष्टसत्तात्वादिना तादृशाभावप्रतियोगिनि सत्ताप्रवत्तिप्रसंगः॥ यत्रैकव्यक्तिकं साध्यं वि
पक्षो यात्र निर्धूमत्वादिव्याप्येतत्वेन साध्ये निर्वह्नित्वादौ चाव्याप्तिस्तत्र हेत्वभावस्याद्यः प्रत्येकं यावद्विपक्षावृत्तित्वे १

त्वादत आह साध्यवदिति। अत्रान्योन्याभावस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिलभ्यं न हि भवति निलोघटो
घटान्य इति॥ नापीति॥ सामानाधिकरण्यं यस्य यदधिकरणं साध्यं तत्त्वं साध्यनिष्ठसामानाधिकरण्यप्रतियोगिकोत्वं
साध्यनिष्ठाधेयतानिरूपकाधिकरणवृत्तित्वमिति यावत्॥ तदनधिकरणत्वमित्यर्थः। साध्यवद्भिन्नस्य च साध्यनिष्ठ
धेयतानिरूपकाधिकत्वात्तद्वृत्तौ व्यभिचारिणि नातिप्रसंगः। साध्यनिष्ठाधेयतानिरूपधिकारणत्वव्यापकाभावप्रति
योग्यधिकरणतासामान्यकत्वमिति तु निष्कर्षः। तेन सत्तावान् द्रव्यत्वादित्यादौ न दोषः। साध्यवैयधिकरण्यं साध्यव
द्भिन्नाधिकरणत्वं चरमाधिकरत्वांशस्य चानतिप्रयोजनतया तदपहाय द्वयमेकोक्त्या तूपदूषयति॥ तदुभयमपीति
साध्येत्यादेः। साध्यं यदधिकरणानधिकरणं तत्त्वाभावः। साध्यस्य यदधिकरणं तद्वृत्तित्वाभावश्चार्थः॥ तत्र केवलान्वयि
नि साध्यनिष्ठाधेयतानिरूपकाधिकरणाप्रसिद्ध्या नानाव्यक्तिसाध्यके च॥ एकसाध्यव्यक्तिनिष्ठाधेयतानिरूपकत्वं
साधनाधिकरणव्यक्त्यंतरस्येत्यव्याप्तिरा धेकचिद्व्यभिचारिण्यतिव्याप्तिश्च॥ द्वितीये च साध्यवैय्यधिकरण्यं यदि
साध्यवत्त्वावच्छिन्नप्रतियोगिताको भेदो विवक्षितस्तदा केवलान्वयिनि॥ यदि च यत्किंचित्साध्यवद्व्यक्तिभेदस्तदा नाना
धिकरणकसाध्यके सर्वत्राव्याप्तिः। केचित्तु। साध्येति। साध्यासामानाधिकरण्यं। हेतुतावच्छेदकसंबंधेन हेत्वधिकरणे ते

नैवसंबंधेनसाध्यवद्वृत्तित्वाभावस्तदधिकरणभिन्नत्वमर्थः॥ तेनधूमस्यस्वावयवेसंयोगेनवन्हिमत्तिसमवायेनास्त्वा
वपिनक्षतिः॥ तादृशाभावश्चसंबंधांतरेणवर्त्तमानेसुलभः। व्यभिचारिणव्यभिचारनिरूपकाधिकरणएवता
दृशितादृशाभाववत्वं॥ सत्तायांगुणेनद्रव्यत्वसामानाधिकरण्यमित्यनुभवात्चैनेवंविशिष्टसत्वेव्याप्तिःवि
शिष्टस्यातिरिक्तत्वात्। अनतिरिकेचविशेषणविशेषसंबंधस्यैवपरंपरयाव्यापकत्वात्। केवलान्वयिनिचाव्याप्तेरभि
धानंद्वितीयलक्षणाभिप्रायेणेत्याहुः। तच्चिंत्यं। सत्तायांगुणेनद्रव्यत्वसामानाधिकरण्यमितिप्रतीतिर्हिद्रव्यत्वेगुणेन
पृथिवीत्वसामानाधिकरण्यमितिप्रतीतिवत्सत्तानिष्टद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्यपरंपरासंबंधेनसा
मानाधिकरण्यस्यवाअभावंगुणेऽवगाहते नतुसत्तायामेवद्रव्यवृत्तित्वाभावंसत्तानद्रव्यवृत्तित्वाभाववतिद्रव्यवृत्ति
त्वाभावोनसत्तावृत्तिरित्यादिसर्वजनसिद्धप्रतीतिबाधितत्वात्॥ बाधकाभावाच्चसंयोगतदभावयोरवच्छेदभेदेनैः
कत्रप्रतीत्यात‍दुभयोरेकत्रसिद्धिः। अनींद्रियसाध्यकेतींद्रियव्यभिचारिण्यतिप्रसंगाच्च॥ तत्रसानाधिकरण्या
भावस्यप्रत्यक्षासंभवेनअसिद्धेः॥ नचतदभाववद्वृत्तित्वेनतदनुमानंतद्वृत्तिभिन्नत्वस्यउपाधित्वात्। किंचइदमिद
नीमितिप्रतीतिनियामकविशेषणताविशेषेणहेतुतायांसद्धेताव्याप्तिः॥ तेनासंबंधेनाधिकरणेकालेतेनसंबं

धेनसाध्यवद्वृत्तित्वस्यवन्हिणोअप्रसिद्धेः॥ ७ ॥ समवायितयेति॥ वाच्यत्वंयथानसमवायितथाग्रेवक्ष्यते॥ घटादि
समवायितयेत्यप्याहुः॥ प्रमेयसाध्यकेभावत्वेनाभावानामभावत्वेनभावानांवृद्धित्वेननिर्वन्हौ अवृत्तिमात्रवृत्ति
गगनत्वादिनाविरुद्धघटत्वपटत्वाभ्यांचप्रमेयपात्रस्याभावःसुलभः॥ ननुपारिभाषिकमेवास्त्वव्यभिचरितत्वं॥
तथाहि॥ यत्समानाधिकरणास्साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकायावंतोऽभावाःप्रतियोगिस
मानाधिकरणास्त्वत्वं॥ सर्वत्रवाच्यत्वाद्यभावस्यतथात्वाद्यावत्वोपादानं॥ अतएवभूतत्वमूर्त्तत्वोभयवान्मूर्त्तत्वादित्यादौ
द्वित्वाद्यवच्छिन्नाभवस्यप्रतियोगिसामानाधिकरण्येपिभूतत्वमनोन्यत्वाद्यभावस्यातथात्वान्नातिप्रसंगः साधनसा
मानाधिकरणस्यगोत्वाद्यभावस्यतत्तत्साध्यव्यक्त्यभावस्यचातथात्वात्साध्यतावच्छेदकेत्यादि॥ येनसंबंधेनहेतु
स्तेनतदधिकरणत्वंबोध्यं॥ तेनात्मत्वेसाध्येसमवायेनहेतोर्ज्ञानस्यविषयतयाधिकरणेघटादौवर्त्तमानस्यसाध्याभा
वस्यातथात्वेपिनक्षतिः॥ एवंदलांतरेपिसंबंधभेदेनिबंधनोदोषःसंबंधैक्यविवक्षयानिरसनीयः॥ रूपादिसामान्या
भावेसाध्येपृथिवीत्वादिकंसद्धेतुरेव॥ प्रलयेपरमाणावुत्पत्तिकालेचावयविनितत्सत्वात्॥ नचप्रतियोगिवध्वंसप्राग
भावयोरप्यंताभावविरोधित्वं॥ मानाभावात्॥ अतएवंतराश्यामेरक्तरूपंनास्तीतिप्रत्ययः॥ नचैवंशोरक्तिमध्वंसाधव

गाहि॥पूर्वापररक्तिमध्वंसप्रागभाववतिरक्तेऽपितथाप्रत्ययप्रसंगात्॥तत्सामानाधिकरण्यंचस्वविशिष्टहेत्वधिकरणाव
च्छेदेनबोध्यंतेनगोत्वे।जन्यद्रव्यत्वप्रलयावृत्तित्वादिनागवादेरभावस्यगवाद्यनधिकरणमेयवच्छेतद्वृत्तिकालेमहाका
लेवृत्तावपियदागोत्वंतदागोत्वकालत्वंतत्रैवत्वादौनातिप्रसंगः॥हेतुमतिप्रलयेतत्सामानाधिकरण्याभावात्॥स्ववि
शिष्टेतिविशेषणात्कपिसंयोगाभाववान्मेयत्वादित्यादौसंयोगाद्यात्मकाभावस्यसाध्याभावस्यसकलहेत्वधिकरणावृ
त्तित्वेपिनक्षतिः॥जलादिवृत्तित्वविशिष्टगोत्वाद्यभावस्तुजलत्वाद्यभोनतुगोत्वाभावःजलादावपितदभावप्रत्ययप्रसंगात्
यत्समानाधिकरणानांसाध्यतावच्छेदकावच्छिन्नप्रकारतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानांयावदभावानांप्रतियो
गितावच्छेदकावच्छिन्नसामानाधिकरण्यंतत्त्वंवातत्॥ज्ञेयत्वत्वादिनावाच्यत्वाद्यभावःसुलभएव॥शेषंदर्शितदिशाव
सेयमतआह॥प्रतियोग्यवृत्तिश्चेति॥केचित्तु॥व्याप्यवृत्तेर्हेतुसमानाधिकरणसाध्याभावस्यप्रतियोगितायाअ
नवच्छेदकंहेतुसमानाधिकरणस्यव्याप्यवृत्तेःप्रतियोगिव्यधिकरणस्यवाभावस्यप्रतियोगितायाःसामानाधिक
रण्येनानवच्छेदकंयत्साध्यतावच्छेदकंतदवच्छिन्नसामानाधिकरण्यंव्याप्तिः॥एवंचव्याप्तेरव्यभिचारित्वसंबंधरूपता
पिसंगच्छते॥हेतौसाध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वस्यैवसाध्यतावच्छेदकेहेतुनिष्ठसाध्याभावप्रतियोगि ३

तावच्छेदकत्वस्यापिव्यभिचारत्वात्॥अवच्छेदकत्वंचेहैतत्पर्याप्त्यधिकरणत्वं॥तेनविशिष्टवन्हेरभावस्यवन्हित्ववन्हित्वोभया
वच्छिन्नाभावस्यचप्रतियोगितावच्छेदकत्वेपिनक्षतिः॥सत्ववतिचगुणादौसंयोगाद्यभावोपिव्याप्यवृत्तिः॥वक्ष्यमाणंवाप्र
तियोगितावच्छेदकानतिरिक्तवृत्तित्वमेवतदवच्छेदकत्वमिहापिबोध्यं॥भवतिचगुणत्वगुणावृत्तित्वद्रव्यमात्रसमवेत
त्वाद्यवच्छिन्नप्रतियोगिताकव्याप्यवृत्त्यभावप्रतियोगितावच्छेदकगुणएवत्वाद्यनतिरिक्तवृत्त्यैवसंयोगत्वमित्याहुः॥साध्यै
तावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यावच्छेदकस्वसमानाधिकरणसाध्याभाववत्त्वकत्वं॥यत्समानाधिकरणसा
ध्याभावप्रमायांसाध्यवत्ताज्ञानप्रतिबंधकत्वंनास्तितत्त्वंवाव्याप्तिरितिनयुक्तम्॥सर्वत्रसाध्याभावपदवैयर्थ्यात्॥य
त्तुसाध्याभाववतियद्वृत्तौप्रसक्ताऽनुमितिविरोधित्वंनास्तितत्त्वंव्याप्तिरितितन्न॥अनुमितिविरोधित्वज्ञानस्यानुमिति
हेतुत्वेसाध्याभाववद्वृत्तित्वज्ञानस्यअनुमित्यविरोधितयाव्यभिचारिण्यतिप्रसंगात्॥केचित्तुयावंतःसाध्याभावाः
प्रत्येकंतत्तत्सजातीयायेतत्तदधिकरणवृत्तित्वाभावास्तद्वत्त्वं॥साजात्यंचसमानासमानाधिकरणधर्मावच्छिन्नप्र
तियोगिताकत्वान्यतररूपेण॥साध्याभावश्चपूर्वोक्तद्वितीयरीत्याप्रत्येतव्यः॥व्याप्यवृत्तिश्चप्रतियोगितावच्छेदकावच्छिन्नप्र
तियोगिव्यधिकरणोवा॥तेनतत्तत्साध्यव्यक्तेरव्याप्यवृत्तेर्वासाध्यस्याभाववतिवृत्तावपितौहेतौव्याप्तिः॥तद्वृत्तित्वाभावश्च

तत्तत्साध्याभावववृत्तित्वा ऽव्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताको बोध्यः॥ तेन साध्याभाववद्व्यक्तिविशेषवृत्तित्वस्य पा
र्थिवत्वादिविशेषितस्य द्वित्वाद्यवच्छिन्नस्य साध्याभाववद्वृत्तित्वस्याभावमादाय नातिप्रसंगः॥ अत्र च हेतुतावच्छेदकसंबंधेन साध्या
ववृत्तित्वं बोध्यं॥ तेन वह्न्याभाववति स्वावयवे धूमस्य वृत्तावपि न दोषः॥ इष्टं च साध्याभावोऽपि हेतुतावच्छेदकसंबंधेन कस्यचिदधि
करणे वर्त्तमानो ग्राह्यः तेन जातिमात्त्वादित्यादौ हेतुतावच्छेदकसंबंधेन साध्याभाववद्वृत्तित्वस्याप्रसिद्धावपि न क्षतिः॥ यद्वा
यावंतस्तादृशाः साध्याभावाः प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्य व्याप्यवृत्तेरभावस्य प्रतियोगितावच्छेदके न धर्मेण य
द्रूपावच्छिन्नं प्रतिव्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं तत्त्वं॥ साधनस्य तादृशाभाववत्प्रतियोगित्वं तदवच्छेदकत्वं वा साधनतावच्छे
दकस्य तु न वाच्य॥ द्रव्यं सत्त्वादित्यादौ सत्त्वादेस्तादृशाभावव्यापकगुणकर्मान्यत्वविशिष्टसत्त्वाद्यवच्छिन्नप्रतियोगिताकतादृशा
भावप्रतियोगित्वाकत्वादति व्याप्तेः॥ इदं ज्ञेयं प्रमेयादित्यादौ प्रमेयत्वादेस्तादृशप्रतियोगितानवच्छेदकत्वादव्याप्तेः॥ प्रमेयत्वव्यधि
करणप्रतियोगित्वस्याप्रसिद्धेः॥ यद्वा यावंतस्तादृशाः साध्याभावाः प्रत्येकं तत्प्रतियोगितावच्छेदकेन यद्रूपावच्छिन्नं प्रतिव्या
पकत्वमवच्छिद्यते तद्रूपतत्त्वमित्याहुः॥ परे तु वृत्तिमद्वृत्तयो यावंतः साध्याभाववद्वृत्तित्वाभावास्तद्वत्त्वं व्याप्तिः॥ येन संबंधेन
हेतुता तेनैव वृत्तिमत्त्वं बोध्यं॥ तेन व्यधिकरण[illegible]धर्मावच्छिन्नवह्न्याभाववति संयोगेन या वृत्तिस्तदभावस्य जात्यादौ वर्त्तमान ४

स्य धूमादावसत्त्वेऽपि न क्षतिः॥ साध्याभावश्च सर्ववद्बोध्यः॥ तद्वद्वृत्तित्वाभावोऽपि स्वव्यापकतत्तत्सा ऽध्याभाववद्वृत्तित्वव्यापकप्रतियोगि
ताकस्तत्तत्साध्याभाववद्वृत्तित्वातिरिक्ते न समानाधिकरणेन साध्याभाववद्वृत्तित्ववृत्तिना वा धर्मेणानवच्छिन्नप्रतियोगि
ताको बोध्यः॥ तेनालोकाद्यवृत्तित्वेन रूपेण यो वह्निसामान्याभाववद्वृत्तित्व[illegible]विरहस्य वाहेतुत्वं रतवृत्तेस्तस्मिन्नसत्त्वेऽपि न क्षति
रित्याहुः॥ अन्ये तु॥ वृत्तिमद्वृत्तयो यावंतः साध्याभावसमुदायाधिकरणवृत्तित्वाभावास्तद्वत्त्वं॥ तादृशवृत्तित्वाभावश्च स्व
व्यापकतादृशवृत्तित्वत्वव्यापकप्रतियोगिताको बोध्यः॥ प्रजयोनं चोक्तप्रायं॥ साध्याभाववद्वृत्तित्वव्यापकप्रतियोताक
स्य च व्यधिकरणधर्मावच्छिन्नस्यैवाभावस्य वृत्तित्वाद्व्यभिचारिण्यतिव्याप्तिरतः समुदायेति॥ साध्याभावश्च साध्यतावच्छे
दकसंबंधेन बोध्यः॥ तेन समवायेन वह्नेः साध्यत्वे धूमे संयोगेन च तथात्वे वह्न्यवयवत्वे च पर्वतवह्न्यवयवसंयोगे च पर्वतस्य
वह्न्यवयवस्य संबंधद्वयावच्छिन्नवह्न्याभावद्वयानधिकरणत्वेऽपि नातिव्याप्तिः॥ स्वव्यापकीभूतसाध्यतावच्छेत्यापकव्यापक
प्रतियोगिताकोऽपि॥ तेन यत्र पृथिवीत्वाभावादौ साध्ये तत्तद्विपक्षावृत्तित्वावच्छिन्नप्रतियोगिताकाभावकूटाधिकरणमप्रसि
द्धं॥ तत्र सद्धेतौ पृथिवीत्वादौ साध्ये जातित्वाद्यवच्छिन्नाभाववति सामान्यादावर्त्तमाने द्रव्यत्वप्रकारकप्रमाविषयत्वादौ नाव्याप्ति
सि[illegible]रतिसिर्वा॥ नाप्यभावत्वादिना अभावादौ साध्ये तत्तत्साध्याभावकूटाधिकरणाप्रसिध्याऽव्याप्तिरित्याहुः॥ तन्न॥ द्रव्य

शि·म·
५

त्वपृथिवीत्वोभयवन्द्रव्यत्वादित्यादौतदुभयान्यतरत्वावच्छिन्नाभाववतिगुणादौद्रव्यत्वादेरवृत्तेरतिव्याप्तिः।अपिचेदंपृथिव्य
न्यत्वद्रव्यत्वतत्द्रव्यत्वात्दित्यादौद्रव्यत्वत्वावच्छिन्नद्रव्यत्वाभावकूटाधिकरणगुणावृत्तित्वस्यद्रव्यत्वेसत्वादतिव्याप्तेः॥
द्रव्यत्वत्वावच्छिन्नप्रतियोगितायाःपृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वात्॥किंच